पद्मबन्धुः, पुं ( पद्मस्य कमलस्य बन्धुः । सूर्य्योदये पद्मस्य प्रकाशतया तथात्वम् । ) सूर्य्यः । इति शब्दरत्नावली ॥ ( पद्मेन बध्यते रुध्यते असौ निशायां मधुलोभात् इति भावः । बन्ध + उन् । ) भ्रमरः । इति शब्दचन्द्रिका ॥

पद्मभूः पुं, ( पद्मं विष्णुनाभिभवकमलं भूरुत्पत्तिस्थानं यस्य । ( यद्वा, पद्मात् भवतीति । भू + क्विप् । ) ब्रह्मा । इति हलायुधः ॥ ( अस्योत्पत्तिकथा यथा भागवते । ६ । १ । ८—६ ।
"परावरेषां भूतानामात्मा यः पुरुषः परः ।
स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन ॥
तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः ।
तस्मिन् जज्ञे महाराज ! स्वयम्भूश्चतुराननः ॥" )

पद्ममुखी, स्त्री, ( पद्मस्य मुखमिव मुखं उत्पत्तिप्रारम्भो यस्याः । स्त्रियां ङीप् । ) दुरालभा । इति शब्दचन्द्रिका ॥ ( पद्मस्य मुखमिव मुखं वदनं यस्य । ) पद्मसदृशमुखविशिष्टे त्रि ॥

पद्मयोनिः, पुं, ( पद्मं विष्णुनाभिकमलं योनिरुत्पत्तिस्थानं यस्य । ) ब्रह्मा । यथा,—
"अस्माच्च कारणाद्ब्रह्मन् ! पुत्त्रो भवतु मे भवान् ।
पद्मयोनिरिति ख्यातो मत्प्रियार्थं जगन्मयः ॥"
इति कौर्म्मे ६ अध्यायः ॥

पद्मरागः, पुं, ( पद्मस्येव रागो यस्य । ) रक्तवर्णमणिविशेषः । माणिक इति भाषा । तत्पर्य्यायः । शोणरत्नम् २ । लोहितकः ३ । इत्यमरः । २ । ६ । ६२ ॥ लोहितम् ४ । कुरुविन्दकम् ५ । इति शब्दरत्नावली ॥ ( बृहत्संहितायां ८२ अध्याये अस्य परीक्षादिकं यथा,—
"सौगन्धिककुरुविन्दस्फटिकेभ्यः पद्मरागसम्भूतिः ।
सौगन्धिकजा भ्रमराञ्जनाब्जजम्बूरसद्युतयः ॥
कुरुविन्दभवाः शबला मन्दद्युतयश्च धातुभिर्विद्धाः ।
स्फटिकभवा द्युतिमन्तो नानावर्णा विशुद्धाश्च ॥
स्निग्धः प्रभानुलेपी स्वच्छोऽर्च्चिष्मान् गुरुः सुसंस्थानः ।
अन्तःप्रभोऽतिरागो मणिरत्नगुणाः समस्तानाम् ॥
कलुषा मन्दद्युतयो लेखाकीर्णाः सधातवः खण्डाः ।
दुर्व्विद्धा न मनोज्ञाः सशर्कराश्चेति मणिदोषाः ॥
भ्रमरशिखिकण्ठवर्णो
दीपशिखासमप्रभो भुजङ्गानाम् ।
भवति मणिः किल मूर्द्धनि योऽनर्घेयः स विज्ञेयः ॥
यस्तं बिभर्त्ति मनुजाधिपतिर्न तस्य
दोषा भवन्ति विषरोगकृताः कदाचित् ।
राष्ट्रे च नित्यमभिवर्षति तस्य देवः
शत्रूंश्च नाशयति तस्य मणेः प्रभावात् ॥
षड्‌विंशतिः सहस्राण्येकस्य मणेः पलप्रमाणस्य ।
कर्षत्रयस्य विंशतिरुपदिष्टा पद्मरागस्य ॥
अर्द्धपलस्य द्वादशकर्षस्यैकस्य षट् सहस्राणि ।
यच्चाष्टमाषकधृतं तस्य सहस्रत्रयं मूल्यम् ॥
माषकचतुष्टयं दशशतक्रयं
द्वौ तु पञ्चशतमूल्यौ ॥
परिकल्प्यमन्तराले
मूल्यं हीनाधिकगुणानाम् ॥
वर्णन्यूनस्यार्द्धं तेजोहीनस्य मूल्यमष्टांशः ।
अल्पगुणो बहुदोषो मूल्यात् प्राप्नोति विंशांशम् ॥
आधूम्रं व्रणबहुलं स्वल्पगुणञ्चाप्नुयाद्‌द्विशतभागम् ।
इति पद्मरागमूल्यं पूर्व्वाचार्य्यैः समुद्दिष्टम् ॥" )
राजनिर्घण्टोक्तपर्य्यायगुणौ माणिक्यशब्दे द्रष्टव्यौ तस्य वर्णा यथा,—
"सिंहले तु भवेद्रक्तं पद्मरागमनुत्तमम् ।
पीतं कालपुरोद्भूतं कुरुविन्दमिति स्मृतम् ॥
अशोकपल्लवच्छायमसुं सौगन्धिकं विदुः ।
तुम्बुरे छायया नीलं नीलगन्धि प्रकीर्त्तितम् ॥
उत्तमं सिंहलोद्भूतं निकृष्टं तुम्बुरोद्भवम् ।
मध्यमं मध्यमं ज्ञेयं माणिक्यं क्षेत्रभेदतः ॥ * ॥
तथा च ।
बन्धूकगुञ्जासकलेन्द्रगोपजवासनासृक्‌समवर्णशोभाः ।
भ्राजिष्णवो दाड़िमबीजवर्णास्तथापरे किंशुकपुष्पभासः ॥
सिन्दूरपद्मोत्पलकुङ्कुमानां
लाक्षारसस्यापि समानवर्णाः ।
सान्द्रे निरागे प्रभया स्वयैव
भान्ति स्वलक्ष्म्या स्फुटमध्यशोभाः ॥
भानोश्च भासामनुवेधयोगमासाद्य रश्मिप्रकरेण दूरम् ।
पार्श्वानि सर्व्वाण्यनुरञ्जयन्ति
गुणोपपन्नाः स्फटिकप्रसूताः ॥
कुसुम्भनीलीव्यतिमिश्ररागप्रत्यग्ररक्ताम्बरतुल्यभासः ।
तथापरेऽरुष्करकण्टकारीपुष्पत्विषो हिङ्गुलकत्विषोऽन्ये ॥
चकोरपुंस्कोकिलसारसानां
नेत्रावभासश्च भवन्ति केचित् ।
अन्ये पुनर्नातिविपुष्पितानां
तुल्यत्विषः कोकनदोदराणाम् ॥
प्रभावकाठिन्यगुरुत्वयोगैः
प्रायः समानाः स्फटिकोद्भवानाम् ।
आनीलरक्तोत्पलचारुभासः
सौगन्धिकाख्या मणयो भवन्ति ॥
यो मन्दरागः कुरुविन्दजेषु
स एव जातः स्फटिकोद्भवेषु ।
निरर्च्चिषोऽन्तर्ब्बहुलीभवन्ति
प्रभाववन्तोऽपि न तत्समानाः ॥
ये तु रावणगङ्गायां जायन्ते कुरुविन्दकाः ।
पद्मरागा घनं रागं बिभ्राणाः स्वस्फुटार्च्चिषः ॥
वर्णानुयायिनस्तेषामन्ध्रदेशे तथापरे ।
न जायन्ते तु ये केचित् मूल्यलेशमवाप्नुयुः ॥
तथैव स्फटिकोत्थानां देशे तुम्बुरसंज्ञके ।
सधर्म्माणः प्रजायन्ते स्वल्पमूल्या हि ते स्मृताः ॥" *

अथ जात्यादि ।
"माणिक्यस्य प्रवक्ष्यामि यथा जातिचतुष्टयम् ।
ब्रह्मक्षत्त्रियवैश्याश्च शूद्रश्चाथ यथाक्रमम् ॥
रक्तश्वेतो भवेद्विप्रस्त्वतिरक्तस्तु क्षत्त्रियः ।
रक्तपीतो भवेद्वैश्यो रक्तनीलस्तथान्त्यजः ।
पद्मरागो भवेद्विप्रः कुरुविन्दस्तु बाहुजः ।
सौगन्धिको भवेद्वैश्यो मांसखण्डस्तथान्त्यजः ॥
शोणपद्मसमाकारः खदिराङ्गारसप्रभः ।
पद्मरागो द्विजः प्रोक्तश्छायाभेदेन सर्व्वदा ॥
गुञ्जासिन्दूरबन्धूकनागरङ्गसमप्रभः ।
दाड़िमीकुसुमाभासः कुरुविन्दस्तु बाहुजः ॥
हिङ्गुलाभाशोकपुष्पाभमीषत्पीतविलोहितम् ।
जवालाक्षारसप्रायं वैश्यं सौगन्धिकं विदुः ॥
आरक्तः कान्तिहीनश्च चिक्कणश्च विशेषतः ।
मांसखण्डसमाभासो ह्यन्त्यजः पापनाशनः ॥"
मांसखण्डस्तु नीलगन्धेः संज्ञा ॥ * ॥

अथ दोषाः ।
"माणिक्यस्य समाख्याता अष्टौ दोषा मुनीश्वरैः ।
द्विच्छायश्च द्विरूपश्च सम्भेदः कर्करस्तथा ॥
अशोभनं कोकिलश्च जलं धूम्राभिधश्च वै ।
गुणाश्चत्वार आख्याताश्छायाः षोड़श कीर्त्तिताः ।
छायास्तु पूर्व्वोक्ता एव ।
"छायाद्वितयसम्बन्धादद्विच्छायं बन्धुनाशनम् ।
द्विरूपं द्विपदन्तेन माणिक्येन पराभवः ॥
सम्भेदो भिन्नमित्युक्तं शस्त्रघातविधायकः ।
कर्करं कर्करायुक्तं पशुबन्धुविनाशकृत् ॥
दुग्धेनेव समालिप्तमघनीपुटमुच्यते ।
अशोभनं समुद्दिष्टं माणिक्यं बहुदुःखकृत् ॥
मधुविन्दुसमच्छायं कोकिलं परिकीर्त्तितम् ।
आयुर्लक्ष्मीयशो हन्ति सदोषं तन्न धारयेत् ॥
रागहीनं जलं प्रोक्तं धनधान्यापवादकृत् ।
धूम्रं धूमसमाकारं वैद्युतं भयमावहेत् ॥
तथा,—
"शोभाद्वितयवन्तो ये मणयः क्षतिकारकाः ।
उभयत्र पदं येषां तेन च स्यात् पराभवः ॥
भिन्नेन युद्धे म्रियते स्यात् कर्करन्धननाशकृत् ।
दुग्धेनेव समालिप्तः पुटके यस्तु सम्भवेत् ॥
दुःखकृत् स समाख्यातो न नृपे रक्षणीयकः ।
मधुविन्दुसमा शोभा कोकिलानां प्रकीर्त्तिता ॥
तेषाञ्च बहुभेदाः स्युर्न ते धार्य्याः कदाचन ॥"

अथ गुणाः ।
"गुरुत्वं स्निग्धता चैव वैमल्यमतिरक्तता ॥"
तथा च ।
"वर्णाधिकं गुरुत्वञ्च स्निग्धता समताच्छता ।
अर्च्चिष्मत्ता महत्ता च मणीनां गुणसंग्रहः ॥" * ॥
फलम् ।
"ये कर्कराच्छिद्रमलोपदिग्धाः
प्रभाविमुक्ताः परुषा विवर्णाः ।
न ते प्रशस्ता मणयो भवन्ति
समानतो जातिगुणैः समस्तैः ॥
दोषोपसृष्टं मणिमप्रबोधाद्
बिभर्त्ति यः कश्चन कश्चिदेकम् ।